# ॥ श्री रुद्र लघुन्यासः ॥

# Śrī Rudra Laghunyāsaḥ

| | |
|---|---|
| ॥ ॐ अथ श्रीरुद्र लघुन्यासः ध्यानम् ॥ | oṁ atha śrīrudra laghunyāsaḥ dhyānam |
| ॥ ॐ अथात्मानं शिवात्मानं श्रीरुद्ररूपं ध्यायेत् ॥ १ ॥ | oṁ athātmānaṁ śivātmānaṁ śrīrudrarūpaṁ dhyāyet (1) |
| शुद्धस्फटिकसङ्काशं त्रिनेत्रं पञ्चवक्त्रकम् । | śuddhasphaṭiksaṅkāśaṁ trinetraṁ pañcavaktrakam |
| गङ्गाधरं दशभुजं सर्वाभरणभूषितम् ॥ २ ॥ | gaṅgādharaṁ daśabhujaṁ sarvābharaṇabhūṣitam (2) |
| नीलग्रीवं शशाङ्काङ्कं नागयज्ञोपवीतिनम् । | nīlagrīvaṁ śaśaṅkāṅkaṁ nāgayajñopavītinam |
| व्याघ्रचर्मोत्तरीयं च वरेण्यमभय-प्रदम् ॥ ३ ॥ | vyāghracarmottarīyaṁ ca vareṇyamabhaya-pradam (3) |
| कमण्डल्वक्षसूत्राणां धारिणं शूलपाणिनम् ॥ ४ ॥ | kamaṇḍalvakṣasūtrāṇāṁ dhāriṇaṁ śūlapāṇinam (4) |
| ज्वलन्तं पिङ्गलजटा-शिखामुद्योतधारिणम् ॥ ५ ॥ | jvalantaṁ piṅgalajaṭā-śikhāmudyotadhāriṇam (5) |
| वृषस्कन्ध-समारूढं उमादेहार्ध-धारिणम् । | vṛṣaskandha-samārūḍhaṁ umādehārdha-dhāriṇam |
| अमृतेनाप्लुतं शान्तं दिव्यभोगसमन्वितम् ॥ ६ ॥ | amṛtenāplutaṁ śāntaṁ divyabhogasamanvitam (6) |
| दिग्देवतासमायुक्तं सुरासुरनमस्कृतम् । | digdevatāsamāyuktaṁ surāsuranamaskṛtam |
| नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम् ॥ ७ ॥ | nityaṁ ca śāśvataṁ śuddhaṁ dhruvamakṣaramavyayam (7) |

सर्वव्यापिन-मीशानं रुद्रं वै विश्वरूपिणम् ।

sarvavyāpina-mīśānaṁ rudraṁ vai viśvarūpiṇam

एवं ध्यात्वा द्विजस्सम्यक् ततो यजनमारभेत् ॥ ८ ॥

evaṁ dhyātvā dvijassamyak tato yajanamārabhet (8)

अथातो रुद्रस्नानार्चनाभिषेकविधिं व्याख्यास्यामः ॥ ९ ॥

athāto rudrasnānārcanābhiṣekavidhiṁ vyākhyāsyāmaḥ (9)

आदित एव तीर्थे स्नात्वा । उदेत्य शुचिः ।

ādita eva tīrthe snātvā udetya śuciḥ

प्रयतो ब्रह्मचारी शुक्लवासा देवाभिमुखः स्थित्वा ।

prayato brahmacārī śuklavāsā devābhimukhaḥ sthitvā

आत्मनि देवताः स्थापयेत् ॥ १० ॥

ātmani devatāḥ sthāpayet (10)

ॐ प्रजनने ब्रह्मा तिष्ठतु ॥ ११ ॥

Oṁ prajanane brahmā tiṣṭhatu (11)

पादयोर्विष्णुस्तिष्ठतु ॥ १२ ॥

pādayorviṣṇustiṣṭhatu (12)

हस्तयोर्हरस्तिष्ठतु ॥ १३ ॥

hastayorharastiṣṭhatu (13)

बाह्वोरिन्द्रस्तिष्ठतु ॥ १४ ॥

bāhvorindrastiṣṭhatu (14)

जठरे अग्निस्तिष्ठतु ॥ १५ ॥

jaṭhare agnistiṣṭhatu (15)

हृदये शिवस्तिष्ठतु ॥ १६ ॥

hṛdaye śivastiṣṭhatu (16)

कण्ठे वसवस्तिष्ठन्तु ॥ १७ ॥

kaṇṭhe vasavastiṣṭhantu (16)

वक्त्रे सरस्वती तिष्ठतु ॥ १८ ॥

vaktre sarasvatī tiṣṭhatu (17)

| | |
|---|---|
| नासिकयोर्वायुस्तिष्ठतु ॥ १९ ॥ | nāsikayorvāyustiṣṭhatu **(19)** |
| नयनयोश्चन्द्रादित्यौ तिष्ठेताम् ॥ २० ॥ | nayanayoścandradityau tiṣṭhetām **(20)** |
| कर्णयोरश्विनौ तिष्ठेताम् ॥ २१ ॥ | karṇayoraśvinau tiṣṭhetām **(21)** |
| ललाटे रुद्रास्तिष्ठन्तु ॥ २२ ॥ | lalāṭe rudrāstiṣṭhantu **(22)** |
| मूर्ध्न्यदित्यास्तिष्ठन्तु ॥ २३ ॥ | mūrddhnyadityāstiṣṭhantu **(23)** |
| शिरसि महादेवस्तिष्ठतु ॥ २४ ॥ | śirasi mahādevastiṣṭhatu **(24)** |
| शिखायां वामदेवस्तिष्ठतु ॥ २५ ॥ | śikhāyāṁ vāmdevastiṣṭhatu **(25)** |
| पृष्ठे पिनाकी तिष्ठतु ॥ २६ ॥ | pṛṣṭhe pinākī tiṣṭhatu **(26)** |
| पुरतः शूली तिष्ठतु ॥ २७ ॥ | purataḥ śūlī tiṣṭhatu **(27)** |
| पार्श्वयोः शिवाशङ्करौ तिष्ठेताम् ॥ २८ ॥ | pārśvayoḥ śivāśaṅkarau tiṣṭhetām **(28)** |
| सर्वतो वायुस्तिष्ठतु ॥ २९ ॥ | sarvato vāyustiṣṭhatu **(29)** |
| ततो बहिः सर्वतोऽग्निर्ज्वालामाला-परिवृतस्तिष्ठतु ॥ ३० ॥ | tato bahiḥ sarvato’gnirjvālāmālā-parivṛtastiṣṭhatu **(30)** |
| सर्वेष्वङ्गेषु सर्वा देवता यथास्थानं तिष्ठन्तु | sarveṣvaṅgeṣu sarvā devatā yathāsthānaṁ tiṣṭhantu |
| सर्वान् महाजनान् रक्षन्तु ॥ ३१ ॥ | sarvān mahājanān rakṣantu **(31)** |

| | |
|---|---|
| मा॒ꣳ रक्ष॒न्तु ॥ ३२ ॥ | māgm̐ rakṣantu (32) |
| अ॒ग्निर्मे॑ वा॒चि श्रि॒तः । वाग्धृद॑ये । हृद॑यं॒ मयि॑ ॥ ३३ ॥ | agnirme vāci śritaḥ vāgdhṛdaye hṛdayaṁ mayi (33) |
| अ॒हम॒मृते᳚ । अ॒मृतं॒ ब्रह्म॑णि ॥ ३४ ॥ | ahamamṛte amṛtaṁ brahmaṇi (34) |
| वा॒युर्मे᳚ प्रा॒णे श्रि॒तः । प्रा॒णो हृद॑ये । हृद॑यं॒ मयि॑ ॥ ३५ ॥ | vāyurme prāṇe śritaḥ prāṇo hṛdaye hṛdayaṁ mayi (35) |
| अ॒हम॒मृते᳚ । अ॒मृतं॒ ब्रह्म॑णि ॥ ३४ ॥ | ahamamṛte amṛtaṁ brahmaṇi (34) |
| सूर्यो॑ मे॒ चक्षुषि श्रि॒तः । चक्षु॒र्हृद॑ये । हृद॑यं॒ मयि॑ ॥ ३६ ॥ | sūryo me cakṣuṣi śritaḥ cakṣurhṛdaye hṛdayaṁ mayi (36) |
| अ॒हम॒मृते᳚ । अ॒मृतं॒ ब्रह्म॑णि ॥ ३४ ॥ | ahamamṛte amṛtaṁ brahmaṇi (34) |
| च॒न्द्रमा॑ मे॒ मन॑सि श्रि॒तः । मनो॒ हृद॑ये । हृद॑यं॒ मयि॑ ॥ ३७ ॥ | candramā me manasi śritaḥ mano hṛdaye hṛdayaṁ mayi (37) |
| अ॒हम॒मृते᳚ । अ॒मृतं॒ ब्रह्म॑णि ॥ ३४ ॥ | ahamamṛte amṛtaṁ brahmaṇi (34) |
| दिशो॑ मे॒ श्रोत्रे᳚ श्रि॒ताः । श्रोत्र॒ꣳ॒ हृद॑ये । हृद॑यं॒ मयि॑ ॥ ३८ ॥ | diśo me śrotre śritāḥ śrotragm̐ hṛdaye hṛdayaṁ mayi (38) |
| अ॒हम॒मृते᳚ । अ॒मृतं॒ ब्रह्म॑णि ॥ ३४ ॥ | ahamamṛte amṛtaṁ brahmaṇi (34) |
| आपो॑ मे॒ रेत॑सि श्रि॒ताः । रेतो॒ हृद॑ये । हृद॑यं॒ मयि॑ ॥ ३९ ॥ | āpo me retasi śritāḥ reto hṛdaye hṛdayaṁ mayi (39) |
| अ॒हम॒मृते᳚ । अ॒मृतं॒ ब्रह्म॑णि ॥ ३४ ॥ | ahamamṛte amṛtaṁ brahmaṇi (34) |

पृ॒थि॒वी मे॒ शरी॑रे श्रि॒ता । शरी॑र॒ꣳ॒ हृद॑ये । हृद॑यं॒ मयि॑ ॥ ४० ॥

pṛthivī me śarīre śritā śarīragm̐ hṛdaye hṛdayaṁ mayi **(40)**

अ॒ह॒मम॒मृते᳚ । अ॒मृतं॒ ब्रह्म॑णि ॥ ३४ ॥

ahamamṛte amṛtaṁ brahmaṇi **(34)**

ओ॒ष॒धि॒व॒न॒स्प॒तयो॑ मे॒ लोम॑सु श्रि॒ताः । लोमा॑नि॒ हृद॑ये । हृद॑यं॒ मयि॑ ॥ ४१ ॥

oṣadhivanaspatayo me lomasu śritāḥ lomāni hṛdaye hṛdayaṁ mayi **(41)**

अ॒ह॒मम॒मृते᳚ । अ॒मृतं॒ ब्रह्म॑णि ॥ ३४ ॥

ahamamṛte amṛtaṁ brahmaṇi **(34)**

इन्द्रो॑ मे॒ बले᳚ श्रि॒तः । बल॒ꣳ॒ हृद॑ये । हृद॑यं॒ मयि॑ ॥ ४२ ॥

indro me bale śritaḥ balgm̐ hṛdaye hṛdayaṁ mayi **(42)**

अ॒ह॒मम॒मृते᳚ । अ॒मृतं॒ ब्रह्म॑णि ॥ ३४ ॥

ahamamṛte amṛtaṁ brahmaṇi **(34)**

प॒र्जन्यो॑ मे मू॒र्ध्नि श्रि॒तः । मू॒र्धा हृद॑ये । हृद॑यं॒ मयि॑ ॥ ४३ ॥

parjanyo me mūrdhni śritaḥ mūrdhā hṛdaye hṛdayaṁ mayi **(43)**

अ॒ह॒मम॒मृते᳚ । अ॒मृतं॒ ब्रह्म॑णि ॥ ३४ ॥

ahamamṛte amṛtaṁ brahmaṇi **(34)**

ईशा॑नो मे म॒न्यौ श्रि॒तः । म॒न्युर्हृद॑ये । हृद॑यं॒ मयि॑ ॥ ४४ ॥

īśāno me manyau śritaḥ manyurhṛdaye hṛdayaṁ mayi **(44)**

अ॒ह॒मम॒मृते᳚ । अ॒मृतं॒ ब्रह्म॑णि ॥ ३४ ॥

ahamamṛte amṛtaṁ brahmaṇi **(34)**

आ॒त्मा म॑ आ॒त्मनि॑ श्रि॒तः । आ॒त्मा हृद॑ये । हृद॑यं॒ मयि॑ ॥ ४५ ॥

ātmā ma ātamani śritaḥ ātmā hṛdaye hṛdayaṁ mayi **(45)**

अ॒ह॒मम॒मृते᳚ । अ॒मृतं॒ ब्रह्म॑णि ॥ ३४ ॥

ahamamṛte amṛtaṁ brahmaṇi **(34)**

पुन॑र्म आ॒त्मा पुन॒रायु॒रागा᳚त् ॥ ४६ ॥

punarma ātmā punarāyurāgāt **(46)**

पुनः॑ प्रा॒णः पुन॒राकू॑त॒मागा᳚त् ॥ ४७ ॥

punaḥ prāṇaḥ punarākūtamāgāt **(47)**

वैश्वानरो रश्मिभिर्वावृधानः ॥ ४८ ॥
vaiśvānaro raśmibhirvāvṛdhānaḥ (48)

अन्तस्तिष्ठत्वमृतस्य गोपाः ॥ ४९ ॥
antastiṣṭhatvamṛtasya gopāḥ (49)

अस्य श्री रुद्राध्यायप्रश्नमहामन्त्रस्य । अघोर ऋषिः ॥ ५० ॥
asya śrī rudrādhyāyapraśnamahāmantrasya aghora ṛṣiḥ (50)

अनुष्टुप्छन्दः । सङ्कर्षणमूर्तिस्वरूपो
anuṣṭupchandaḥ saṅkarṣaṇamūrtisvarūpo

योऽसावादित्यः परमपुरुषः स एष रुद्रो देवता ॥ ५१ ॥
yo’sāvādityaḥ paramapuruṣaḥ sa eṣa rudro devatā (51)

नमः शिवायेति बीजम् ॥ ५२ ॥
namaḥ śivāyeti bījam (52)

शिवतरायेति शक्तिः ॥ ५३ ॥
śivatarāyeti śaktiḥ (53)

महादेवायेति कीलकम् ॥ ५४ ॥
mahādevāyeti kīlakam (54)

श्रीसाम्बसदाशिवप्रसादसिद्ध्यर्थे ज्ञानवैराग्य-
śrīsāmbasadāśiva-prasādasiddhyarthe jñānavairāgya-

मोक्षसिद्ध्यर्थे । जपे विनियोगः ॥ ५५ ॥
mokṣadiddhyarthe jape viniyogaḥ (55)

ॐ अग्निहोत्रात्मने अङ्गुष्ठाभ्यां नमः ॥ ५६ ॥
Oṁ agnihotrātmane aṅguṣṭhābhyāṁ namaḥ (56)

दर्शपूर्णमासात्मने तर्जनीभ्यां नमः ॥ ५७ ॥
darśapūrṇamāsātmane tarjanībhyāṁ namaḥ (57)

चातुर्मास्यात्मने मध्यमाभ्यां नमः ॥ ५८ ॥
cāturmāsyātmane madhyamābhyāṁ namaḥ (58)

निरूढपशुबन्धात्मने अनामिकाभ्यां नमः ॥ ५९ ॥
nirūḍhapaśubandhātmane anāmikābhyāṁ namaḥ (59)

| | |
|---|---|
| ज्योतिष्टोमात्मने कनिष्ठिकाभ्यां नमः ॥ ६० ॥ | jyotiṭṣomātmane kaniṣṭhikābhyāṁ namaḥ **(60)** |
| सर्वक्रत्वात्मने करतलकरपृष्ठाभ्यां नमः ॥ ६१ ॥ | sarvakratvātmane karatalakarapṛṣṭhābhyāṁ namaḥ **(61)** |
| अग्निहोत्रात्मने हृदयाय नमः ॥ ६२ ॥ | agnihotrātmane hṛdayāya namaḥ **(62)** |
| दर्शपूर्णमासात्मने शिरसे स्वाहा ॥ ६३ ॥ | darśapūrṇamāsātmane śirase svāhā **(63)** |
| चातुर्मास्यात्मने शिखायै वषट् ॥ ६४ ॥ | cāturmāsyātmane śikhāyai vaṣaṭ **(64)** |
| निरूढपशुबन्धात्मने कवचाय हुँ ॥ ६५ ॥ | nirūḍhapaśubandhātmane kavacāya hum̐ **(65)** |
| ज्योतिष्टोमात्मने नेत्रत्रयाय वौषट् ॥ ६६ ॥ | jyotiṣṭomātmane netratrayāya vauṣaṭ **(66)** |
| सर्वक्रत्वात्मने अस्त्राय फट् ॥ ६७ ॥ | sarvakratvātmane astrāya phaṭ **(67)** |
| भूर्भुवस्सुवरोमिति दिग्बन्धः ॥ ६८ ॥ | bhūrbhuvassuvaromiti digbandhaḥ **(68)** |

## ॥ ध्यानम् ॥ / Dhyānam

आपाताल-नभः स्थलान्त-भुवन-ब्रह्माण्ड-माविस्फुरत्
ज्योतिः-स्फाटिक-लिङ्ग-मौलि-विलसत्पूर्णेन्दु-वान्तामृतैः ।

āpātāla-nabhaḥ sthalānta-bhuvana-brahmāṇḍa-māvisphurat
jyotiḥ-sphāṭika-liṅga-maulli-vilasatpūrṇendu-vāntāmṛtaiḥ

अस्तोकाप्लुत-मेक-मीश-मनिशं रुद्रानुवाकाञ्जपन्
ध्याये-दीप्सित-सिद्धये ध्रुवपदं विप्रोऽभिषिञ्चे-च्छिवम् ॥ १ ॥

ब्रह्माण्डव्याप्तदेहा भसितहिमरुचा भासमाना भुजङ्गैः
कण्ठे कालाः कपर्दाकलित-शशिकला-श्चण्डाकोदण्डहस्ताः ।
त्र्यक्षा रुद्राक्षमालाः प्रकटितविभवाः शाम्भवा मूर्तिभेदाः
रुद्राः श्रीरुद्रसूक्त-प्रकटितविभवा नः प्रयच्छन्तु सौख्यम् ॥ २ ॥

ॐ ग॒णानां᳚ त्वा ग॒णप॑तिग्ँ हवामहे
क॒विं क॑वी॒नामु॑प॒मश्र॑वस्तमम् ।
ज्ये॒ष्ठ॒राजं॒ ब्रह्म॑णां ब्रह्मणस्पत॒ आ
नः॑ शृ॒ण्वन्नू॒तिभि॑स्सीद॒ साद॑नम् ॥
महागणपतये॒ नम॑ः ॥

astokāpluta-meka-mīśa-maniśaṁ rudrānuvākāñjapan
dhyāye-dīpsita-siddhaye dhruvapadaṁ vipro'bhiṣiñce-cchivam
**(1)**

brahmāṇḍavyāptadehā bhasitahimarucā bhāsamānā bhujaṅgaiḥ
kaṇṭhe kālāḥ kapardākalita-śaśikalā-ścaṇḍākodaṇḍahastāḥ
tryakṣā rudrākṣamālāḥ prakaṭitavibhavāḥ śāmbhavā mūrtibhedāḥ
rudrāḥ śrīrudrasūkta-prakaṭitavibhavā naḥ prayacchantu saukhyam
**(2)**

Oṁ gaṇānāṁ tvā gaṇpatigm̐havāmahe
kaviṁ kavīnāmupamaśravastamam
jyeṣṭharājaṁ brahmaṇāṁ brahmaṇaspata ā
naḥ śṛṇvannūthbhissīda sādanam
mahāgaṇapataye namaḥ

| ॥ शान्तिपाठः ॥ | Śāntipāṭhaḥ |
|---|---|
| ॐ शं च॑ मे॒ मय॑श्च मे | Oṁ śaṁ ca me mayaśca me |
| प्रि॒यं च॑ मेऽनुका॒मश्च॑ मे॒ काम॑श्च मे | priyaṁ ca me nukāmaśca me kāmaśca me |
| सौमन॒सश्च॑ मे भ॒द्रं च॑ मे॒ | saumanasaśca me bhadraṁ ca me |
| श्रेय॑श्च मे॒ वस्य॑श्च मे॒ यश॑श्च मे॒ | śreyaśca me vasyaśca me yaśaśca me |
| भग॑श्च मे॒ द्रवि॑णं च मे | bhagaśca me draviṇaṁ ca me |
| य॒न्ता च॑ मे ध॒र्ता च॑ मे॒ | yantā ca me dhartā ca me |
| क्षेम॑श्च मे॒ धृति॑श्च मे॒ | kṣemaśca me dhṛtiśca me |
| विश्वं॑ च मे॒ मह॑श्च मे | viśvaṁ ca me mahaśca me |
| सं॒विच्च॑ मे॒ ज्ञात्रं॑ च मे॒ | saṁvicca me jñātraṁ ca me |
| सूश्च॑ मे प्र॒सूश्च॑ मे॒ | sūśca me prasūśca me |
| सीरं॑ च मे ल॒यश्च॑ म ऋ॒तं च॑ मे॒ऽमृतं॑ च | sīraṁ ca me layaśca ma ṛtaṁ ca me'mṛtaṁ ca |
| मेऽय॒क्ष्मं च॒ मेऽना॑मयच्च मे | me'yakṣmaṁ ca me'nāmayacca me |

| | |
|---|---|
| जी॒वातु॑श्च मे दी॒र्घा॑यु॒त्वं च॑ | jīvātuśca me dīrghāyutvaṁ ca |
| मेऽनमि॒त्रं च॒ मेऽभ॑यं च मे | me’namitraṁ ca me’bhayaṁ ca me |
| सु॒गं च॑ मे॒ शय॑नं च मे सू॒षा च॑ मे | sugaṁ ca me śayanaṁ ca me sūṣā ca me |
| सु॒दिनं॑ च मे ॥ | sudinaṁ ca me |
| ॥ ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥ | Oṁ śāntiḥ śāntiḥ śāntiḥ |
| हरिः ॐ श्रीगुरुभ्यो ममः हरिः ॐ | hariḥ Oṁ śrīgurubhyo namaḥ hariḥ Oṁ |